कारित्वं। अल्पश्लेष्मदातृत्वं। हृद्यत्वं। रुचिजनकत्वं। मूत्रशुद्धिकारित्वं। देहस्य कान्तिदातृत्वं। बलकारित्वं। पीयूषोपमत्वं। त्रिदोषशमनत्वञ्च। इति राजनिर्घण्टः॥ यन्त्रनिष्पीडितरसगुणाः। रक्तशुक्रकारित्वं। शीतलत्वं। सारकत्वं। रुचिकरत्वं। दाहजनकत्वञ्च॥ इति राजवल्लभः॥ अपि च। दन्तनिष्पीडितरसगुणावद्गुरुत्वं। किञ्चित् पित्तवायुनाशित्वं। अकोमलत्वं। अस्वादुत्वं। चीरविष्टम्भदाहकारित्वञ्च। पर्य्युषितेतद्रसगुणाः। वान्तिहरत्वं। वातजनकत्वं। जाड्यप्रतिश्यायरोगदातृत्वं। कफवायुकारित्वञ्च। इति राजनिर्घण्टः॥ तत्पक्वरसगुणाः। गुरुत्वं। सुतीक्ष्णत्वं। कफवातनाशित्वञ्च। इति राजवल्लभः॥ स्निग्धत्वं। अतिशयगुरुत्वं। अतिपाके विदाहत्वं। पित्तास्रदोषकारित्वञ्च। इति राजनिर्घण्टः॥

अस्य विकाराः॥

"लसीकाफाणितगुडखण्डमत्स्यण्डिकासिताः।
निर्म्मला लघवो ज्ञेयाः शीतवीर्य्या यथोत्तरम्"॥
इति राजवल्लभः। अथेक्षुवर्गः। तत्रेक्षोर्नामानि गुणाश्च।

"इक्षुर्दीर्घच्छदः प्रोक्तस्तथा भूरिरसोऽपि च।
गुडमूलोऽसिपत्रश्च तथा मधुतृणः स्मृतः॥
इक्षवो रक्तपित्तघ्ना बल्या वृष्याः कफप्रदाः।
स्वादुपाकरसाः स्निग्धा गुरवो मूत्रला हिमाः"॥*॥

अथेक्षुभेदाः।

"पौण्ड्रको भीरुकश्चापि वंशकः शतपोरकः।
कान्तारस्तापसेक्षुश्च काण्डेक्षुः सूचिपत्रकः॥
नैपालो दीर्घपत्रश्च नीलपोरोऽथ कोशकृत्।
इत्येता जातयस्तेषां कथयामि गुणानपि"॥*॥

अथ पौण्ड्रकभीरुकयोर्गुणाः।

"वातपित्तप्रशमनो मधुरो रसपाकयोः।
सुशीतो वृंहणो बल्यः पौण्ड्रको भीरुकस्तथा"॥*॥

अथ कोशकारगुणाः।

"कोशकारो गुरुः शीतो रक्तपित्तक्षयापहः"॥*॥

अथ कान्तारेक्षुगुणाः।

"कान्तारेक्षुर्गुरुर्वृष्यः श्लेष्मलो वृंहणः सरः"॥*॥

अथ दीर्घपोरवंशकयोर्गुणाः।

"दीर्घपोरः सुकठिनः सक्षारो वंशकः स्मृतः"॥*॥

अथ शतपोरकगुणाः।

"शतपर्व्वा भवेत् किञ्चित् कोशकारगुणान्वितः।
विशेषात् किञ्चिदुष्णश्च सक्षारः पवनापहः"॥*॥

अथ मनोगुप्तागुणाः।

"मनोगुप्ता वातहरी तृष्णामयविनाशिनी।
सुशीता मधुरातीव रक्तपित्तविनाशिनी"॥*॥

अथ तापसेक्षुगुणाः।

"तापसेक्षुर्भवेत् मृद्वी मधुरा श्लेष्मकोपना।
तर्पणा रुचिकृच्चापि वृष्या च बलकारिणी"॥*॥

अथ बालयुवजीर्णेक्षुगुणाः।

"बाल इक्षुः कफं कुर्य्यान्मेदोमेहकरश्च सः।
युवा तु वातहृत् स्वादुरीषत्तीक्ष्णश्च पित्तनुत्॥
रक्तपित्तहरो वृद्धः क्षतहृत् बलवीर्य्यकृत्"॥*॥

अथाङ्गभेदेन भेदः।

"मूले तु मधुरोऽत्यर्थं मध्येऽपि मधुरः स्मृतः।
अग्रे ग्रन्थिषु च ज्ञेयं इक्षुः पटुरसो अतः"॥*॥

अथ दन्तपीडितेक्षुरसगुणाः॥

"दन्तनिष्पीडितस्येक्षोः रसः पित्तास्रनाशनः।
शर्करासमवीर्य्यः स्यादविदाही कफप्रदः"॥*॥

अथ यन्त्रपीडितस्येक्षुरसस्य गुणाः।

"मूलाग्रजन्तु ग्रन्थ्यादिपीडनान्मलसंकरात्।
किञ्चित् कालं विधृत्याच विकृतिं याति यान्त्रिकः॥
तस्माद्विदाही विष्टम्भी गुरुः स्याद्यान्त्रिको रसः"॥

अथ पर्य्युषितस्येक्षुरसस्य गुणाः।

"रसः पर्य्युषितो नेष्टो ह्यम्लो वातापहो गुरुः।
कफपित्तकरः शोषी भेदनश्चातिमूत्रलः"॥*॥

अथ पक्वस्येक्षुरसस्य गुणाः।

"पक्वो रसो गुरुः स्निग्धः सुतीक्ष्णः कफवातनुत्॥
गुल्मानाहप्रशमनः किञ्चित्पित्तहरः स्मृतः"॥*॥

अथेक्षुरसस्य विकाराणां गुणाः।

"इक्षोर्विकारास्तृड्दाहमूर्च्छापित्तास्रनाशनाः।
गुरवो मधुरा बल्याः स्निग्धा वातहराः सराः॥
वृष्या मोहहराः शीता वृंहणा विषहारिणः"॥
इति भावप्रकाशः॥

(अथ श्वेतेक्षुगुणाः।

"रसायनोत्तमो बल्यो रोगवारणमुत्तमः।
स्निग्धश्च तर्पणो वृष्यो वृंहणश्च सजीवनः॥
स्वादुगुणाभिवृद्धत्वाद्वातपित्तप्रशान्तिकृत्।
वृष्योऽप्यन्तर्विदाही स्यात् सितेक्षुः कफकृन्मतः"॥

अथ कृष्णेक्षुगुणाः।

"तद्वत् सुलक्षणो भवनं गुणानां
वृष्यो भवेत्तर्पणवृंहणश्च।
सञ्जीवनं स्यान्मधुरो रसेन
शोषापहर्त्ता व्रणशोककारी"॥*॥

अथ यन्त्रोद्भवरसगुणाः।

"यन्त्रेण पीडितरसः कथितो गुरुश्च
वृष्यः कफस्य कुरुतेऽथ सुशीतलश्च।
पाके विदाहिबलकृच्च सुशोभनश्च
संसेवितो रुधिरपित्तरुजं निहन्ति"॥*॥

अथ दन्तपीडितरसगुणाः।

"दन्तेन पीडितरसो रुचिकृद्गुरुश्च
सन्तर्पणो बलकरः कफकृच्छ्रमघ्नः।
विष्टम्भकोऽपि रुधिरञ्च तथैव पित्तं
शोषं निहन्ति मधुरः स हिमो सरश्च"॥*॥

अथ पक्वरसगुणाः॥*॥

"पक्वो गुरुतरः स्निग्धः सुतीक्ष्णः कफवातहा।
पित्तघ्नोऽपि विशेषेण गुल्मातिसारकासनुत्"॥*॥
इति हारीतः। तथा च वाभटः शार्ङ्गधरश्च।

"इक्षोः रसो गुरुः स्निग्धो वृंहणः कफमूत्रकृत्।
वृष्यः शीतोऽस्रपित्तघ्नः स्वादुपाकरसः सरः।
सोऽग्रे सलवणो दन्तपीडितः शर्करासमः॥
मूलाग्रजन्तुजग्धादिपीडनान्मलसङ्करात्।
किञ्चित्कालं विधृत्या च विकृतिं याति यान्त्रिकः।
विदाही गुरुविष्टम्भी तेनासौ तत्र पौण्ड्रकः।
शैत्यप्रसादमाधुर्य्यैर्वरस्तमनुवांशिकः॥
शतपर्व्वककान्तारनैपालाद्यास्ततः क्रमात्।
सक्षाराः सकषायाश्च सोष्णाः किञ्चिद्विदाहिनः"॥

"वृष्यः शीतः स्थिरः स्निग्धो वृंहणो मधुरो रसः।
श्लेष्मणो भक्षितस्येक्षोर्यान्त्रिकस्तु विदह्यते॥
शैत्यात् प्रसादान्माधुर्य्यात् पौण्ड्रकाद्वंशको वरः"।
इति चरकः॥ तथा च सुश्रुते॥

"इक्षवो मधुरा विपाका गुरवः शीताः स्निग्धबल्या वृष्या मूत्रला रक्तपित्तप्रशमनाः क्रिमिकफकराश्चेति ते चानेकविधाः। तद्यथा,—

"पौण्ड्रको भीरुकश्चैव वंशकः शतपोरकः।
कान्तारस्तापसेक्षुश्च काष्ठेक्षुः सूचिपत्रकः॥
नैपालो दीर्घपत्रश्च नीलपोरोऽथ कोशकृत्।
इत्येता जातयः स्थौल्याद्गुणान् वक्ष्याम्यतः परम्॥
सुशीतो मधुरः स्निग्धो वृंहणः श्लेष्मणः सरः।
अविदाही गुरुर्वृष्यः पौण्ड्रको भीरुकस्तथा॥
आभ्यां तुल्यगुणः किञ्चित्सक्षारो वंशको मतः।
वंशवच्छतपोरस्तु किञ्चिदुष्णः स वातहा॥
कान्तारतापसाविक्षू वंशकानुगुणौ मतौ।
एवंगुणस्तु काष्ठेक्षुः स तु वातप्रकोपणः॥
सूचीपत्रो नीलपोरो नैपालो दीर्घपत्रकः।
वातलाः कफपित्तघ्नाः सकषाया विदाहिनः॥
कोशकारो गुरुः शीतो रक्तपित्तक्षयापहः।
अतीवमधुरो मूले मध्ये मधुर एव तु॥
अग्रेष्वक्षिषु विज्ञेय इक्षूणां लवणो रसः।
अविदाही कफकरो वातपित्तनिवारणः॥
वक्त्रप्रह्लादनो वृष्यो दन्तनिष्पीडितो रसः।
गुरुर्विदाही विष्टम्भी यान्त्रिकस्तु प्रकीर्त्तितः॥
पक्वो गुरुः सरः स्निग्धः सुतीक्ष्णः कफवातनुत्"।)
कोकिलाक्षवृक्षः। इति राजनिर्घण्टः॥

इक्षुकाण्डः, पुं, (इक्षुवृक्षस्य काण्ड इव काण्डो यस्य।) मुञ्जकः। शरमुञ्ज इति ख्यातः। इति शब्दचन्द्रिका॥ (यथा, रामायणे २।९१।१५।
"अपराश्चोदकं शीतमिक्षुकाण्डरसोपमम्"।)
काशतृणम्। इति राजनिर्घण्टः॥

इक्षुगन्धः, पुं, (इक्षुवृक्षस्य गन्ध इव गन्धो यस्य।) काशतृणम्। इति भावप्रकाशः॥ क्षुद्रगोक्षुरकवृक्षः। इति राजनिर्घण्टः॥

इक्षुगन्धा, स्त्री, (इक्षुगन्ध + टाप्।) गोक्षुरकवृक्षः। गोखुरी इति भाषा। शुक्लभूमिकुष्माण्डः। कोकिलाक्षवृक्षः। कुलिया खारा इति भाषा। काशतृणम्। इत्यमरो मेदिनी च॥ काशिया इति भाषा।

इक्षुगन्धिका, स्त्री, (इक्षुगन्ध + कन् + टाप्।) भूमिकुष्माण्डः। इति शब्दरत्नावली॥ (भूमिकुष्माण्डशब्देऽस्या गुणादयो ज्ञेयाः॥)

इक्षुतुल्या, स्त्री, (इक्षोस्तुल्या।) तृणविशेषः। खानाख इति ख्याता। तत्पर्य्यायः। इक्षुवाटिका २ अनिक्षुः ३ इक्षुवालिका ४। इति रत्नमाला॥

इक्षुदर्भा, स्त्री, (इक्षुवृक्षस्य दर्भा बन्ध इव दर्भो यस्याः।) तृणविशेषः। तत्पर्य्यायः। सुदर्भा २ पत्रालुः ३ तृणपत्रिका ४। अस्या गुणाः। समधुरत्वं। स्निग्धत्वं। ईषत्कामायत्वं। कफपित्तहरत्वं। रुचिजनकत्वं। लघुत्वं। परमतृप्तिकारित्वञ्च।